एस्.जगन्नाथः।मैसूरु
jagannathas1956@gmail.com

दशदिशम्

१२

११.११.२०२१

गुरुवासरः

दशस्वपि दिक्षु कटाक्षं पातयन्ती संस्कृतपत्रिका।

जगन्नाथीयम्

आपादमौलिपर्यन्तं प्राणिषि त्वं यया गिरा।
मम्मी ड्याडीति तत्रत्यौ यौ शब्दौ द्वेक्षि तौ कथम्?॥
यया रचयसि ग्रन्थान् यया बध्नासि पीठिकाम्।
तद्द्वेषमोष्ठयुग्मात् त्वं निःसार्यापि न लज्जसे॥
''इण्डियां'' नेच्छसि त्वं चेद् ''भारतं'' यद्यपेक्षसे।
यदि त्वं द्वेक्षि ''मे हिस् सोल् (May his soul)
रेस्ट् इन् पीस् '' (rest in peace) **इति भाषणम्॥**
यदि त्वं ''संस्कृतं श्रेष्ठं नेङ्ग्लीष् '' इति च गर्जसि।
लिख भाषस्व चाश्रित्य संस्कृतं दृढकौतुकात्॥

कोरोना किमपैति ?
प्रायो न-द्रुतमुग्रा।
यावत् स्यान्न जना नः
सृष्टस्वीयविवेकाः॥
चीनीयै रचितैषा
संप्रत्यादृतविश्वा।
प्रागेकाकृतिरासीद्
येदानीं बहुरूपा॥
विस्फूर्जद्गुरुशक्तेर्
एतस्या हननाय।
भूयासुः सफलानि
प्राज्ञानां यतनानि॥
गन्धान् भूरि मनुष्या
घ्रायासू रुचिराणाम्।
आरोग्याभिधभूम्याम्
आमोदाख्यसुमानाम्॥

स्वदेशीयमिति भावना

स्वदेशीयमिति स्वातन्त्र्यायोधनं यत् प्रवृत्तं भारते स किमुपज्ञमिति प्रश्नः।दयानन्द इत्युत्तर मित्यत्र न कोऽपि संशयः।भारतीयता इत्यस्य स्पष्ट मर्थं स एव लोकानां पुरस्तादुपास्थापयत्।श्रूयते यत् कदाचित् दयानन्दप्रवर्तितासु सभासूपतिष्ठन् धौतीधारी कश्चन पुरुषः कस्मिंश्चिद् दिने षर्ट् प्याण्ट् धारी सन् दयानन्दस्याक्षि लक्ष्यीभूतः। दया नन्दः स्मयमान उवाच-भवता अस्माकं राष्ट्रस्य वस्त्राणि तथैव धरणीयानि-यथैव भारतीया धरन्ति। एतदेव देशप्रेम्णो द्योतकम्।इति।बहुषु सभासु तेन प्रसंगवशाद् भारते ब्रिटिष्जनानां परकीयत्वं भारतीयानां च स्वकीयत्वं घुष्टमसकृत्। स्वगुरुणा दण्डिना विरजानन्देन उपदिष्टं पन्थानमा श्रित्य स भारतीयत्वशङ्खमधमत्।विरजानन्दश्च एवमुपादिशद् दयानन्दम्- संस्कृतवाङ्मयं हि द्वि विधम्- महाभारतयुद्धायोधनात् पूर्वं विरचितं साहित्यं महाभारतयुद्धायोधनादनन्तरं विरचितं साहित्यमिति।प्राग्भवं वाङ्मयम् ऋषिभिर्मुनिभि र्भव्यधीभिः कृतं यत्पाठकानां ज्ञानं विवेकः स,ानता इत्यादिका सुगुणा उपचयं गमिष्यन्ति।उत्तरभवे साहित्ये असूया, नीचता, द्वेष इत्यादिकान् दुर्भावान् प्रचोदयितारो भागाः सन्ति यत्पाठकानां दुश्चेष्टया राष्ट्रोऽस्माकमवसीदति।यदि भारते जनानां विवेक विज्ञानादयः सुगुणा वर्धिषीरन्नित्य स्माकमाशा, ऋषिमुनिप्रणीतान् ग्रन्थानेव पठन्तु भारतीया न

पुनरनृषिकृतान् ग्रन्थान्।भीष्मादय आचार्याः अकर्तव्यपरायणाः सन्तो युद्धस्यानायोधने नैव प्रायतन्त। भीष्मस्तु स्वयं शास्त्रज्ञः सन्नपि अर्थस्य पुरुषो दासो नार्थस्तु कस्यचित् इति व्याजं कल्पयन् दुर्योधनं निन्दन्नपि तत्पक्षे एव स्थितः सन् स्वस्यैव पौत्रान् विरुध्य धनुर्विद्याकौशलं दर्शयन् सहस्रशो जनान् अहन्।

ब्रह्मकाव्यम्।

चतुर्थः सर्गः

१.अथाभवत् पूर्तिरनुज्झितक्रमा
विवाहनीयेति निजं गृहं जनाः।
तदीयवार्ताकथया मुदाऽन्विताः
स्वनीडमूका इव ते प्रतस्थिरे।
२.मदीयसंशीतिविषोग्रवीरुधः
क्व तीक्ष्णधारः परशुर्विलोक्यते।
इति स्वचिन्तामुपगूह्य चेतसि
प्रसन्नपद्माननशङ्करो बभौ।
३.क्रमेण वर्षाणि गतानि कानिचिन्
नरा अजायन्त मृताश्च केचन।
तदेव दृश्यं जडचेतनात्मकं
महाद्भुतं किञ्चिदभून्न कुत्रचित्।।
४.वयोविवृद्धिं समुपागते सुते
तदीयशिक्षाग्रहणादिमं विधिम्।
अकारयत् साधु पिता पुरोहितैः
परम्परीणैरुपनीतिनामकम्।
५.मनोरुचीनामनुसृत्य पद्धतीर्
यथाकथञ्चिद् भवितुं न युज्यते।
बतेत ऊर्ध्वं न तरुर्न खेलनं
परन्तु धूमैर्नयनाम्बुवर्षणम्।
६.क्रियाक्रमाः शास्त्रगतेन वर्त्मना
मयाऽप्यनुष्ठेयतया पुरः स्थिताः।
किमत्यजत्खेलनको भवन् हृदा
भजेयमप्रत्नपथे सुपान्थताम्।
७.कदाचिदश्रूयत देहचित्तयोः
क्वचिद् रुजाकृन्नरकाभिधं स्थितम्।
मयेति या सा श्रुतिकर्कशा पुरा
गुरुव्रजीयाऽवितथैव भारती।
८.सरस्सु मीनग्रहणाय मौनतः
परिश्रमेण प्रथिता वरं बकाः।
अमी न पुण्यग्रहणाय वेदिषु
प्रयत्नवन्तो रटनाः पुरोधसः।
९.परोऽपि दोषोऽस्त्युपनीत्यनन्तरं
मदीयशीर्षप्रतिभेदभैरवः।
यदर्जनीया गुरुनामधारिणः
कृपा वटूनां मनुजस्य कस्यचित् ।
१०.किमर्थमग्निः परिषेव्यतां मया
हविः सुरान् प्रापयतीति भक्तितः।
गुणो न कश्चिद् हविषां समर्पणैर्
न कोऽपि दोषो हविषामनर्पणैः ।
११.प्ररोहणं न श्रुतपूर्वमूषरे
समुप्तबीजस्य जलाभिवृष्टितः।
प्रसादनं न श्रुतिवर्त्मनि स्थितं
सुरस्य वेद्यां हविरादिहोमतः।
१२.वयोऽधिकाः किं मनसि प्रयोजनं
समुद्दिशन्त्यस्मृतखेलनक्षणाः।
पठन्ति चर्चन्ति तथा च पुस्तक-
स्थितानि धून्वन्ति रजांसि ये सदा।
१३.इतिप्रभृत्यस्थिरचित्तवृत्तिना
विकल्पजातं यदकारि तत्समम्।
बभूव भस्मान्तरितस्फुलिङ्गवद्
बहिःप्रकाशावसरानुपालकम्।
१४.स मन्दमन्दं गमितो विनेयतां
हृदः स्वतन्त्राद् गुरुणाऽपकर्षितः।
विधेयतावान् क्रमशो विधीयते
वनाद् गृहीतः कलभो निषादिना।

१५.कृतैरनिम्नस्तरवद्भिरग्रतो
गुरोः परिप्रश्नशरैर्निरन्तरम्।
अनुत्तरं वीक्ष्य विनोदवानयं
शिशुत्वतोऽमन्यत तं पराजितम्।
१६.परन्तु तस्योपचयं क्रमाद् गतः
क्रियाक्रमानुष्ठितिसंभवो रसः।
अमोघवेदाध्ययनेन निर्मलो
जलाभिषेकेण शनैरिवाङ्कुरः।
१७.मुखाद् विसर्पद् गुरुणा गले धृतं
प्रकाशितं मण्डलितैः कपोलकैः।
अजायतासम्यगबद्धयुक्तिभिर्
विनेयसङ्घे हसनं कदाचन।
१८.गतं सदा संकुसुकं स्वशैशवं
मनःपटेऽचित्रयदाशु कश्चन।
गुरूक्ति-जामित्व-विरागवन्मना
बहिस्तु कुर्वन्नवधाननाटकम्।
१९.गुरुर्विदित्वाऽपि विनेय-धी-रुजं
स्वपाठधारागिरमन्ववर्तयत्।
क्षमा विदन् शासनपूतभारती
र्मनोगुहादीपनभानुकर्मणि।।
२०.समैर्विनेयैः कुशकोटिपाटवे
धृतेऽपि मेधातिशयेन शङ्करः।
सरे मणीनामिव मेरुको गुरोः
कटाक्षपातप्रथमत्वमाप्तवान्।
२१.मयाऽपि कस्मिंश्चिदनेहसीर्यते
विनेयमागामिनि शास्त्रवाङ्मयम्।
मनोरथश्चालित एष केनचि
द्गुरूक्तिपाठे सुतरामुदासिना।
२२.विनोदकाले श्रवणाभिषेचनी
प्रहासपाली धृतविग्रहा बभौ।
द्विजावलीर्दाडिमबीजपङ्क्तिभां
द्विजाननान्निर्गमयन्त्यनर्गलम्।
२३.ख-लीन-दृक् कोऽपि गुरूक्तपृच्छया
प्रदत्त**शिष्याम्बरसूचि**नाम-कः।
श्रवोत्सवं हासझरं व्यवर्तयद्
विनेयकण्ठाख्यबिलान्महास्वनम्।
२४.कदाऽपि घोरा अभवत् प्रवर्तना
विनेयमध्ये कलहस्फुलिङ्गिनः।
तदा समाधानविधानवैदुषीं
स्वकां तदग्रे गुरुरित्यदर्शयत्।
२५.''द्रुमस्य पत्राणि हतानि झञ्झया
चलानि वेगादपि नैव कुर्वते।
उपक्रमं वा कलहस्य कर्हिचित्
परस्परेण प्रतियोधनानि वा।
२६.कथञ्चिदेकार्णवगर्भसंभवाः
मिथोमहाघट्टनशब्दकारिकाः।
कदाऽपि कल्लोलमहापरंपराः
किमार्यवर्येषु सुनीतिबोधिकाः?
२७.न किं द्वयं वः स्तवपुष्पमञ्जरी
निरन्तरार्चाक्रमभूरिभाजनम्।
परम्परीणाध्वगताऽध्वनीनता
शमान्विता धीरपि शास्त्रनिर्मला?
२८.इदं च वत्सा अवधीयतां वचो
न गच्छतो द्वे मम बुद्धिपद्धतौ।
सतीर्थ्यवृन्दे मतिघर्षणं मिथस्
तथा प्रसूनस्तबके रणोद्यमः।
२९.स्ववाक्यपूगे सति गिर्यधित्यका
प्रवातवातागमफल्गुविक्रमे।
गुरुर्महादण्डमलात् करे झटित्य्
अयोऽयसेऽलं न पुनर्मणीचकम्।
३०.हृदश्च पाणेरपि कूर्चकेसरान्-
तरङ्गशल्के क्रमशो निदानयन्।
गुरुर्जनिं प्राप हि लोकभूतल-
प्रपुञ्जितध्वान्तसमूहभास्करः।
३१.क्रमेण शिष्यान् सकलान् सशङ्करान्
विसृज्यमानार्भकयोग्यचापलान्।
अनन्ददत्यन्तमवेक्ष्य देशिको
यथा द्रुमान् संत्यजदङ्कुरस्थितीन्।

३२.न केवलं वृक्षमयानि विष्टपान्य्
अतोऽस्ति भिन्ना जगती महत्तरा।
विबोध एवं जनिमापदुज्ज्वलो
विनेयमस्तिष्कतमःप्रदीपनः।
३३.चिरन्तनोक्त्यध्ययनानु तैः पद-
प्रकाशकव्याकरणावलोडनम्।
कृतं ततो वाक्यविचारणापुरे
कृतप्रवेशैः समवापि पौरता।
३४.पदप्रसंगा कृतवाक्यविस्तृतिः
प्रमाणजाला शुभवादनिर्मला।
सभासु चर्चा बुधवृन्दपुप्फुसो
गुरूक्तिशिष्योक्तिषु जीववत्यभूत्।
३५.विलोकयन् वंशपरम्परालता
सुमस्य सूनोर्वरबुद्धिपाटवम्।
पिता भविष्यद्विषयप्रसंगिनं
ससर्ज सुष्वप्नमयं त्रिविष्टपम्।
३६.सुतस्य मेधा सुमना इव क्रमात्
समुन्मिषन्ती कृतलोकरञ्जना।
अमुष्य पाण्डित्यमहाध्वगामिनां
न सुप्रशस्ता पदवी दवीयसी।
३७.पुरा सभायां विबुधेन्द्रभारती
यदा श्रुता ब्रह्मविचारमण्डना।
मनोऽम्बरे वर्णिलमाशु चित्रितं
तदा मया चित्रमतीवबन्धुरम्।
३८.तनूजमाप्यासमनिन्द्यविग्रहं
बुधेन्द्रमापोषितवेदवारिधिम्।
विबोधकर्मद्विविधासिभीकरं
सभासमुच्छिन्नपरोक्तिविष्टरम्।
३९.इमा गिरा भर्तृजगद्विनिःसृता
बुधेन्द्रकर्णाहितवादकर्कशाः।
तथाऽप्यनुद्घाटिततुण्डपण्डितैर्
जयन्ति संसद्यविरोधलेशतः।
४०.क्रतूचितग्रन्थकृमिप्रणाशनैर्
गतं न किं मे तरसाऽर्थमायुषः?
जनिष्यमाणस्तनुजो धृषीष्ट सद्-
विचारचार्वीं धियमात्मसाधिकाम्।
४१.तदेतदत्यद्भुतमुद्भवेदिति
क्रतुक्रमा लोभवशादनुष्ठिताः।
परं, फलं श्मश्रु शशप्रभं तथा
ममाभवद्दर्पणकृत्यवच्छिरः।
४२.न पाठयत्येष गुरुर्मुदेति न
प्रियं न पाठ्यं तनुजस्य चेति न।
परन्तु मत्सूनुधियोऽवलम्बनं
भवेद् व्रतत्या द्रुरिवावलम्बनम्।
४३.बहोस्तिथान्नीरसमन्त्रवन्मरौ
पदे पदे यत् स्खलनेन दुःखितम्।
विचारदुग्धैरभिषेचनेन तत्
प्रमोदरम्यां परिवृत्तिमञ्चतु।
४४.गुरोः पुरस्तात् कथमेतदुच्यताम्
अनार्यजुष्टैरिव वाक्यवर्त्मभिः?
इति ब्रुवाणः स मनः स्वकं स्वयं
विकाङ्क्षया मौनमगच्छदाश्रयम्।
४५.कदाऽपि विक्षुब्धविचित्रमानसे
जनिं विचारः समवाप शङ्करे।
मनो मम क्षुल्लकसंशयास्पदं
महत्तरं पर्यनुयोगमुज्झति।
४६.गुरोर्मदुक्त्याऽनुचितप्रसंगया
न शोभतेऽङ्गारमिवाम्बुसंगतम्।
दधानया सत्समयौचितीं पुनः
प्रसादवत्पद्ममनोज्ञमाननम्।
४७.कृतं किमर्थं परिणामपेशलैर्
वचःप्रकारैर्बहुकण्ठशोषणम्?
कुतूहलद्वेषणचण्डविक्रमे
गुरौ स्वगुर्वादृत-मात्र-वाक्-क्रमे।
४८.ममैव चित्ते बहुधा विकल्पना
भवन्ति वाऽन्येष्वपि संभवन्त्यमूः।
बहिःप्रशान्तेषु जलेषु वारिधेर्
इवान्तरुग्रा जलजन्तुपङ्क्तयः।

४९.अहो बतावैमि धियं गुणाधिकां
दधत् स्वमस्मिन् सकलेऽपि विष्टपे।
परद्रुमीयच्छदसंमितां निजां
दलावलिं स्वर्णमयीमिवाङ्घ्रिपः।
५०.निगूह्य कष्टेन सतीर्थ्यगोचरं
समाश्रयद् वर्तनमेव शङ्करः।
विचित्रविन्यासविलक्षणोक्तिभिर्
वयोऽधिकातङ्कविकारचातुरीम्।।
५१.प्रचण्डवेगः पवनः कदाचन
क्षमो द्रुमोत्पाटनघोरकर्मणि।
कदाऽपि सौम्यः किल मन्दमारुता-
ऽभिधानदात्रीं श्रयते गतिं हिताम्।।
५२.कदाऽपि हास्यावलिरर्थशून्यया
गिरेत्यनेनेतरशिष्यवत् कृता।
कदाचिदाचार्यवचःसुधारसे
निमज्ञनैः संविहितं कुतूहलम्।
५३.कदाचिदुद्वीक्ष्य विलक्षणां धियं
विनेयसंस्थां गुरुरित्यचिन्तयत्।
मदीयशिष्यव्रजरत्नमेष किं
बिभर्ति मेधां न वयोऽतिगामिनीम्?
५४.अमुष्य सामान्यगुरूपदेश्यता
शुचेऽन्वितस्याश्रुतपूर्वया धिया।
निधेयताऽसह्यमनोरुजे न किं
मणेरयोनिर्मितपेटिकान्तरे?
५५.ललास कस्मिंश्चन वासरे दिन
प्रकाशनव्यग्रमना दिवाकरः।
द्युदेवताकुङ्कुममण्डलोऽथवा
नभःफलोद्यानगमाम्रमद्भुतम्।
५६.द्युमद्-गिरीशाद् द्युति-देववाहिनी
जगत्तमःकल्मषनाशदीक्षिता।
पपात गत्या रभसप्रकारया
स-भूरिसंतोष-जनप्रतीक्षिता।
५७.द्युमद्-रथाङ्गाद् द्यु-निशाण-तेजने
सति स्फुटद्-द्योतकणाः क्षमातले।
चिरान्निपेतुः शिशिरत्वसंगिनस्
तुषारबिन्दुव्रजसख्यकाङ्क्षिणः।
५८.तमोऽहितेन प्रथमं शनैः शनैर्
गभस्तिदूतैः क्रियमाणसन्धिवाक्।
अभूज्जनानामतिसौम्यतेजसा
नभोमणिर्नेत्रमनोज्ञमण्डलः।
५९.प्रसर्पणारम्भमहोग्रवेगिनः
प्रभञ्जनाघट्टनमन्दगामिनः।
तरुच्छदश्लक्ष्णशरीरपातिनः
खगस्य पादाः समुपाविशन् क्षितौ।
६०.समीरणाकम्पभरैर्द्रुमैः स्फुरन्-
महाप्रमोदैरिव साधु कम्पितम्।
रविं विलोक्यार्धदिनादनन्तरं
बहिश्चरप्राणकदम्बकायितम्।
६१.यथा यथा भानुमता गभस्तिभिर्
दृढान्धकारप्रततिर्विनाशिता।
तथा तथा मानसमाक्रमीन्नृणां
नृपेण बाणैः परपूः पराजिता।
६२.सुताम्ररम्यो रविराम्रबन्धुरस्
ततः कनत्काञ्चनबिम्बसुन्दरः।
महामनोज्ञो घनगोलकाकृतिस्
ततोऽभवद्रूप्यवपुर्दुरीक्षणः।
६३.नभोऽङ्गनेऽस्माभिरभीक्ष्यतेऽन्वहं
दिनोदयब्रह्मकलाकुतूहली।
तथाऽपि तद्दर्शनकौतुकं मनाङ्
न लोपमेतीति खगैर्विरावितम्।
६४.पराक्रमोऽभूत् प्रचुरो गते दिने
ततोऽधिकोऽद्य क्रियते कृमिग्रहे।
इतीव चञ्चूपुटकेन नीडजै
रकूजि कीटादनकर्मधर्मिभिः।
६५.शशैः शशाङ्कार्भकरम्यविग्रहैः
कटाक्षितैः कामदृशेव केकिभिः।
सजीवचित्रैरिव चैणजालकैर्
बभूव शालापदमक्षितर्पणम्।

६६.क्रतुक्रियावेदिषु बद्धसौहृदः
प्रमोदवान् मन्त्रमुखो द्विजव्रजः।
द्रुमेषु शाखामृगसख्यसंमदो
विरावचुञ्चुश्च परो द्विजव्रजः।
६७.दृढेष्टकानिर्मितहोमवेदिषु
क्रियाकृदीक्षारुचिरोऽर्चिरुज्ज्वलः।
कणैरुषःकालिकभानुमण्डलाद्
विसर्जितैर्जात इवानलो बभौ।
६८.तदा महर्षिर्नयनस्य गोचरो
बभूव कश्चित् स्मितसुन्दराननः।
स्वतेजसा द्योतयताऽश्रमस्थलं
रविद्युतीनामिव पुञ्जनात् कृतः।
६९.वपुः प्रकाशस्य समीपमीक्षितं
किमु प्रमोदस्य शमस्य चाथवा।
विधातृलोकात् पतितस्य तेजसः
पुरः स्फुरद् बिम्बमुताक्षितर्पणम्।
७०.त्रिधामकीलप्रतिमल्लतां गतैः
प्रणिस्सरद्भिर्वपुषो महांशुभिः।
विभासयन् भूमितलं समन्ततस्
तथाऽप्यनुग्रां विकिरन् द्युतिं दृशा।
७१.हुतस्य जीर्णत्वमपेक्ष्य वेदिका-
बहिर्गतः सन्निव जङ्गमोऽनलः।
दिवाकरोत्सृष्टकरैर्विनिर्मितः
प्रकाशपुञ्जो मनुजत्वमास्थितः।
७२.मनोमुदे प्राप तदाऽध्वनीनतां
दृगध्वनि द्रागयमाश्रमौकसाम्।
न किं विकासाय सरोरुहां जवाद्
विलोकितो दीधितिमान् नभोऽङ्गणे।
७३.समैरथाभ्युद्गतमादरान्वितैः
स्मिताननैराश्रमवासिभिस्तदा।
सितांशुसंदर्शनतः समुद्गगैर्
महातरङ्गैरिव फेनसुन्दरैः।
७४.न तस्य किन्तां मुनयो विजानते
तथैव कौतस्कुततां च ते मनाक्।
तथाऽपि तद्दर्शनतो मुदायत
द्युमद्-दृशेः श्रीरिव पङ्कजव्रजे।
७५.अमीभिराबद्धकराब्जसंपुटैः
स वन्दितोऽवन्ध्यतपःफलो मुनिः।
असूचयत् स्वस्ति मनोज्ञकान्तिना
प्रफुल्लपद्मप्रतिमेन पाणिना।
७६.पदद्वयं तस्य बभौ क्षणं तदा
महार्घकर्पूरशरावपाण्डुरम्।
विनीतिनम्राश्रमवासिहस्तज
च्छटानिपाताच्छविभा-समाश्रयम्।
७७.मुदा तदानीं पठकैश्च पाठकैः
समर्प्य पाद्यार्घ्यममुष्य तेन च।
कृतं स्मितं वीक्ष्य हृदाऽऽहितः स्मयः
स्वकां सदर्हां सरणिं धृतां प्रति।
७८.ततो द्विजालीविभया विभासयन्
गुरुव्रजीयो मुनिमाह कश्चन।
सुधाविधानं वचनेन कुर्वता
समादराश्लेषगुणाद् गरीयसा।
७९.महर्षिवर्यार्य वयं भवत्कृपा-
कटाक्षपातादभवाम गर्विणः।
किमल्पतोषं प्रददाति जीविनां
जलीयबिन्दोः पतनं मरुस्थले?
८०.अनुग्रहो दृष्टियुगेन मञ्जुना
प्रसारितः प्राग्भवता ततः कृतः।
मरीचिरच्छो मृदुलः सुधामयो
विशालदुग्धोदधिगर्भसंभवः।
८१.मुने! भवद्दर्शनधन्यतां दधद्
भवत्यहो ! ईक्षणमीक्षणं हि नः।
दिनप्रणीरश्मिनिपातनोज्ज्वलं
कुशेशयं वास्तविकं कुशेशयम्।
८२.त्वदीयविश्लेषविषादनाकुलं
स्थलं किमित्युक्तिमयीं कृपां कुरु।
इदं च विब्रूहि कया तवाख्यया
पदव्रजोऽनुग्रहपात्रतां गतः।

८३.अदो गरीयो गुरुशिष्यजालकं
विदीर्यमाणं कुतुकेन किंविधम्।
करोतु तोषं वद पूरयापि नः
श्रवान् सुशीतैः सहसा सुधाझरैः।।
८४.ततो गिरा तक्रजगर्वशातनी
मुनेर्मुखाब्जान्निरसारि मञ्जुला।
हितार्थमाकर्णयतां, सुशीतला
धुनीव शैलाद् विमला निमज्जताम्।
८५.महोदयैतन्न महाद्भुताय मे
यदार्यमुक्तं भवताऽऽर्य! संप्रति।
जनस्य कस्यापि करोति विस्मयं
न कांस्यनादः किल कांस्यसंभवः।
८६.क्रियाक्रमस्फीतमनोभिरस्मि यत्
सुभाषितस्तन्मुदमातनोति मे।
किमेति मेघस्तनितैर्नभोगतैः
शिखी न वाचालित आशु मोदनम्?
८७.गुरुप्रसादात् सुविचारपोषिणीं
विबोधवीध्रां तिमिरान्नघस्मरीम्।
चलामि वेदान्तविचारदीपिकां
समाददानो भुवि हर्षवर्षिणीम्।
८८.जनैरिहाकार्यत एष विग्रहः
पदेन **गोविन्द** इति प्रियागमाः !
परन्तु लोकव्यवहारगोचरे
न वर्तते नाम्नि रुचिः कदाऽपि मे।
८९.प्रमोदनोद्रेकवशात् स्फुटाम्यहं
जगत्यमुष्मिन् निखिलेऽपि सर्वदा ।
कदाऽपि मां शोकलवोऽपि नाञ्चति
प्रभाकरं न ह्ययते तमोलवः।
९०.इदं स्थलं सोऽहममोघवेद-निर्-
विधूत-बोध-स्मृतिविघ्न आगतः।
प्रमोदभूम्ना मणिकाञ्चनस्फुरत्-
सुकण्ठहारप्रतिमोऽस्मि संप्रति।
९१.मदीयसंदर्शनमस्तु मा मुधा
हृदि क्षरत्वाशु ममाधुना सुधा।
विना विकाङ्क्षां वरयध्वमिच्छया
कया मुदं वः करवाणि सिद्धया?
९२.इतीरयित्वा स उदारवाचया
प्रसादभव्यां स्वदृशं न्यपातयत्।
सितांशुबिम्बोद्गतकान्तिरेखिकां
कुवेष्विवाचार्यमुखेषु वेदवित् ।
९३.उवाच कुर्वन् गुरुरञ्जलिं सतां
मनःपटीसृष्टसरोजकुड्मलम्।
नुदन् विपश्चित् वदनाद् वचःक्रमं
मृदङ्गनादप्रतियोगपण्डितम्।
९४.प्रसन्नमस्मासु मनस्तवास्ति चेद्
इहैव कञ्चित् समयं मुने! वसन्।
विचारमूले क्रकचीयकौशलं
प्रदर्शयास्मद्विशयद्रुमव्रजे।
९५.वचनं निशम्य गुरुतुण्डनिःसृतं
लपितं मुनेर्निरसरन्न किञ्चन।
परमस्य नेत्रयुगकान्तकान्तितः
स्मिततोऽपि हार्दमभवत् प्रकाशितम्।
९६.स्वगिरा मम संशयव्रजं
द्यति वृष्ट्येव रजःकदम्बकम्।
मुनिरित्यवगत्य देशिकः
स्फुटति स्माथ मुदा हृदा तदा।
९७.आसीन्मुनीन्द्रगुरुराजकृतेयमागूर्
वेदान्तवाक्यनिकुरम्बविचारणाभिः ।
संसारनामकदृढस्वपने रतानां
जागर्तिजन्मकुशलः किल शङ्खनादः।

इति ब्रह्मकाव्ये चतुर्थः सर्गः।

एताश्चतस्रः प्रतिज्ञाः करणीयाः संस्कृतज्ञैः-

१.संस्कृतग्रन्थेषु पीठिकां संस्कृतेनैव रचयामि।
२.संस्कृतसंशोधनलेखानामुल्लेखं भृशं करोमि।
३.आधुनिकान् संस्कृतग्रन्थानधिकृत्य प्रबन्धान् विमर्शान् संस्कृतेन करोमि।
४.संस्कृतसम्मेलनेषु संस्कृतेनैव भाषे।